# शब्दविमर्शः - क्वरप्प्रत्ययान्तशब्दानामवलोकनम्।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## 1. गत्वरः।

द्रौपद्या वाचो निशम्य युद्धेन राज्यश्रिया सह शाश्वतं यशः सम्पादनीयमिति समर्थयति भीमसेनः। अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः। अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम्।। इति किरातार्जु-नीयम् (२.१९)। वैरनिर्यातनमात्रनिष्ठस्यात एव गत्वरैर्गमनशीलैरस्थिरैः प्राणैः स्थिरं यशः सङ्ग्रहीतुमिच्छतः विद्युतः स्फुरणवच्चञ्चलं भवति सम्पद् इति भावः। अनुषङ्गादागतमानुषङ्गिकमन्वाचयशिष्टमल्पं फलम्। मानत्राणजं यश एव मुख्यं फलमभ्युच्चयस्तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्यमित्यर्थः। गत्वरैरित्यत्र 'गत्वरश्च' (३.२.१६४) इति सूत्रेण 'गत्वरः' इत्येतत्क्वरबन्तन्निपातनेनाभिहितम्।

तत्रैव किरातार्जुनीये सुतादातिथेयीमपचितिमासाद्य विष्टरे विश्रम्य देवेन्द्रः अर्जुनकृतस्य तपसः प्रशंसां कुर्व न्नाचष्टे शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः। आपातरम्या विषयाः पर्यन्तपरितापिनः।। इति किरातार्जुनीयम् (११.१२)। यौवनश्रियस्तावत् शरदम्बुधरच्छाया इव गत्वर्यश्चञ्चला इति यावत्। विषयाः शब्दादयस्तु आपातरम्यास्तत्कालरमणीयाः। परन्तु पर्यन्तपरितापिनोऽर्थादवसाने परितापयन्ति दुःखं कुर्वन्तीत्याशयः। प्राग्वदत्रापि गत्वर्य इत्यत्र 'गत्वरश्च' (३.२.१६४) इति सूत्रेण 'गत्वरः' इत्येतत्क्वरबन्तन्निपातनेनाभिहितम्। तदन्तात् 'टिड्ढाणञ्' (४.१.१५) इत्यादिना ङीप्।

प्राक्तनलेखेषु क्वरबन्ताः कतिचन शब्दाः काव्येभ्य उद्धृत्य प्रतिपादिताः। तेषामयमत्र सङ्ग्रहः। 'इण्नशजिसर्त्ति- भ्यः क्वरप्' (३.२.१६३) इति सूत्रेण 'इण् गतौ' (अदा.१०४५), 'णश अदर्शने' (दिवा.११९४), 'जि जये' (भ्वा.५६१), 'सृ गतौ' (भ्वा.९३२) इत्येतेभ्यो धातुभ्यः तच्छीलतद्धर्म तत्साधुकारिष्वर्थेषु क्वरप्प्रत्ययो विहितः। यथा इत्वरः। नश्वरः। जित्वरः। सृत्वरः। क्वरप्प्रत्यये ककारोऽनुबन्धः। 'क्ङिति च' (१.१.५) इति गुणनिषेधः प्रयोजनम्। पकारोऽनुबन्धः 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुगर्थः। वर इति शिष्यते। 'आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु' (३.२.१३४) इत्यारभ्य 'भ्राजभास...' (३.२.१७७) इत्यनभिव्याप्य तच्छीलाधिकारः। तत्रोत्सर्गतस्तृन्विहितः। तस्यायमपवादः। ततस्तत्रैव 'गत्वरश्च' (३.२.१६४) इति सूत्रेण 'गत्वरः' इत्येतत्क्वरबन्तन्निपातनेनाभिहितम्। झलादिप्रत्ययपरकत्वाभावात् 'अनुदात्तोपदेशवनति' (६.४.३७) इत्यादिना अनुनासिकलोपस्याप्राप्तौ सत्यामिदं निपातितम्।

एवञ्चेत् सत्वरमिति कथम् ? श्रूयताम्। तत्र 'ञित्वरा सम्भ्रमे' (भ्वा.७७५) इत्यस्मात् 'गत्यर्थाकर्मक....' (३.४.७२) इत्यादिना कर्तरि क्तः। 'घटादयः षितः' इति षित्वातिदेशात् 'षिद्भिदादिभ्योऽङ्' (३.३.१०४) इत्यङ्। ततष्टाबादयः। त्वरा इति सम्पद्यते। ततः त्वरया सहेत्यर्थेऽव्ययीभावसमासे 'सहस्य सः संज्ञायाम्'

(६.३.७८) इति सादेशः। नायं क्वरबन्तः। एतेन त्वरान्ताः सर्वे शब्दाः क्वरबन्ताः इति निर्णयाय न त्वरताम्।

त्यक्ताऽत्रानुपूर्वी। कथमिव ? इण्नशजिसर्तिभ्यः खलु क्वरप् ? आम्। तर्हि इत्वरः नश्वरः जित्वरः इत्यनन्तरं सृत्वरशब्दः पठनीयः। तदिह भवता त्यक्त्वा गत्वरश्चेति निपातनमन्वधावि। कुतस्तथा ? सृत्वरशब्दस्योदाहरणानि विरलान्येवास्मत्स्मृतौ वर्तन्ते। तथापि तद्विषयेऽपीषच्छ्रूयताम्।

*

## 2. सृत्वरः ।

शिशुपालवधे कृष्णस्य सबलस्य इन्द्रप्रस्थं प्रति प्रस्थानवर्णनाप्रसङ्गे कृष्णः कथमशोभत इति वर्णयति स इन्द्रनीलस्थलनीलमूर्ती रराज कर्चूरपिशङ्गवासाः। विसृत्वरैरम्बुरुहां रजोभिर्यमस्वसुश्चित्र इवोदभारः।। इति शिशुपालवधम् (३.११)। इन्द्रनीलस्थलमिव श्यामाङ्गः तथा हरितालमिव पिशङ्गं वासो यस्य स पीताम्बरो हरिः विसृत्वरैर्विसृमरैः अम्बुजानां परागैश्चित्रवर्णो यमस्वसुर्यमुनाया उदकस्य भारः पूरः = उदभारः स इव रराजेति भावः। विसृत्वरैरित्यत्र 'सृ गतौ' (भ्वा 932) इत्यस्मात् 'इण्नशजिसर्त्तिभ्यः क्वरप्' (३.२.१६३) इति क्वरप्प्रत्यये 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुगागमः।

*